# संस्कृत वार्ताः

**दिनाङ्क : 13/05/2026** **सायम् - 06:20**

**आदौ मुख्यवार्ताः**

- **पश्चिम-एशिया-संघर्षेन उद्भूतस्य वैश्विक-ऊर्जा-सङ्कटकालस्य मध्ये प्रधानमन्त्रिणः नरेन्द्र-मोदिनः आह्वानस्य अनन्तरं केन्द्र-राज्ययोः इन्धन-संरक्षणस्य उपायाः तीव्राः जाताः।**

- **केन्द्रीयमन्त्रिमण्डलेन चतुर्दश-खरिफेति ग्रैष्मिक-सस्यानां न्यूनतमसमर्थनमूल्यं स्वीकृतम्; सूर्यपुष्पस्य बीजस्य सर्वाधिकवृद्धिः, तदनन्तरं कार्पासतिलयोः च।**

- **तमिलनाडु-राज्ये, सी. जोसेफ् विजयस्य नेतृत्वे टी. वी. के. सर्वकारेण राज्य-विधानसभायां सहज-बहुमतेन शक्ति-परीक्षणं विजितम्; एन्. रंगसामिः पञ्चमं बारं पुदुचेरी-राज्यस्य कार्यकालाय मुख्यमन्त्रीरूपेण शपथं स्वीकृतवान्।**

- **सी. बी. एस्. ई. द्वारा अखिलभारतीय वरिष्ठमाध्यमिकवर्गस्य द्वादशी कक्षायाः परीक्षा परिणामाः घेषिताः।**

---------------------------------------------------

**प्रधानमन्त्री आग्रह**

प्रधानमन्त्री नरेन्द्रमोदी विशेषरक्षा-समूहस्य (एस्. पी. जी.) प्रोटोकाल् इत्यस्य अन्तर्गतं सर्वाः आवश्यकाः सुरक्षाव्यवस्थाः अवलम्ब्य सद्यः एव आन्तरिकयात्रासु स्वस्य यात्रावाहनानां संख्या न्यूनीकृतवान्। सुत्रानुसरं प्रधानमन्त्रिणः यात्रावाहनानां सङ्ख्यायां न्यूनीकरणं तस्य सद्यः गुजरातस्य असम्-राज्यस्य च भ्रमणकाले कार्यान्वितम्। आर्थिक-स्थिरतायै योगदानाय नागरिकान् प्रति प्रधानमन्त्रिणः सप्ताग्रहाणाम् अनुरूपम् एतत् अभवत्। प्रधानमन्त्रिणः नरेन्द्र-मोदिनः आग्रहानन्तरं, केन्द्रीय-गृह-मन्त्री अमितशाहेन, उत्तरप्रदेशस्य, मध्यप्रदेशस्य, दिल्ल्याः च मुख्यमन्त्रिभिः, विधायकैः, जनप्रतिनिधिभिः च आधिकारिकयानानां संख्या पञ्चाशत् प्रतिशतं यावत् न्यूनीकर्तुं आदेशः प्रदत्तः।

---------------------------------------------------

**प्रधानमन्त्री यात्रा**

प्रधानमन्त्री नरेन्द्र-मोदी शुक्रवासरे संयुक्त-अरब-अमीरात, नेदरलैण्ड्स्, स्वीडन्, नार्वे, इटली-देशानां षड्दिवसीययात्रां करिष्यति। अद्य सायङ्काले नवदिल्ल्यां प्रसारमाध्यमान् सम्बोधयन् विदेशमन्त्रालयस्य सचिवः सिबी जार्जः संसूचितवान् यत् पञ्चदेशानां यात्रायाः प्रथमे चरणे श्रीमोदी शुक्रवासरे संयुक्त-अरब-अमीरात-देशम् प्राप्स्यति, यत्र सः राष्ट्रपतिना शेख मोहम्मद बीन जायद अल नह्यान इत्यनेन सह मेलनं करिष्यति। सः अवदत् यत् उभौ नेतारौ द्विपक्षीयविषयेषु, विशेषतः ऊर्जा-सहकार्ये, अपि च परस्परहितसम्बद्धेषु क्षेत्रीय-अन्तार्राष्ट्रीयविषयेषु च विचारविनिमयं करिष्यतः।

---------------------------------------------------

## परमाणु-परीक्षणं

प्रधानमन्त्रिणा नरेन्द्र मोदिना अद्य अष्टनवत्यधिकनवदश-शत-तमे वर्षे अस्मिन् दिने भारते कृत-परमाणु-परीक्षणस्य स्मरणं कृतम्। सामाजिक-माध्यमेषु एकं संस्कृत-सुभाषितं विनिमयी कुर्वन् प्रधानमन्त्री उक्तवान् यत् एतत् परमाणु-परीक्षणं देशस्य अविचल-सङ्कल्पं प्रदर्शयति। श्रीमोदी अवदत् यत् अस्य परीक्षणस्य अनन्तरं सम्पूर्णेन विश्वेन भारतं संपीडितम्, परञ्च देशेन सिद्धीकृतं यत् कापि शक्तिः भारतं अवरोद्धुं न शक्नोति।

-----------------------------------------------

## मन्त्रिमण्डल खरिफ

केन्द्रीयमन्त्रिमण्डलेन विपणन-सत्रस्य षड्विंशत्यधिक द्विसहस्र सप्तविंशत्यधिक द्विसहस्र वर्षयोः कृते चतुर्दश खरिफ इति ग्रैष्मिक-सस्यानां न्यूनतमसमर्थनमूल्ये वृद्धिं स्वीकृतम्। केन्द्रीयमन्त्रिमण्डलस्य सभायाः अनन्तरं प्रसारमाध्यमान् सम्बोधयन् सूचना-प्रसारण-मन्त्री अश्विनी-वैष्णवः अवदत् यत्, सर्वकारेण ग्रैष्मिक-सस्यानां न्यूनतम-समर्थन-मूल्यम् वर्धितम् अस्ति येन उत्पादकेभ्यः तेषां उत्पादानां कृते लाभप्रदं मूल्यं सुनिश्चितं भविष्यति। सः अवदत् यत्, ग्रैष्मिक-कालस्य कृते कृषकाणां कृते प्रायः षष्ठीसहस्राधिक द्विलक्ष-कोटि-रूप्यकाणि प्रदीयन्ते। सः अवदत् यत्, अस्मिन् ऋतौ चतुर्विंशत्यधिकअष्टशत लक्ष-मेट्रिक्-टन्- तोप्यधिकानि सस्यानि प्राप्तानि भविष्यन्ति। श्री वैष्णवः अवदत् यत्, एम्. एस्. पी. मध्ये सर्वाधिकं द्वाविंशत्यधिकषट्शतं रूप्यकाणि प्रति क्विण्टल् वृद्धिः सूर्यमुखीबीजानां कृते अनुशंसितम्, तदनन्तरं सप्तपञ्चाशदधिक पञ्चशतं रूप्यकाणि प्रति क्विण्टल् कार्पासस्य कृते, पञ्चशतं रूप्यकाणि प्रति क्विण्टल् तिलस्य कृते च अनुशंसितम् अस्ति।

-----------------------------------------------

## मन्त्रिमण्डल भू-अङ्गार

केन्द्रीयमन्त्रिमण्डलेन भू-अङ्गारस्य तथा लिग्नाईट-गैसिफ़िकेशन्-परियोजनायाः प्रोत्साहनाय सार्द्धसप्तत्रिंशत्कोटिरूप्यकाणां वित्तीयव्ययस्य योजना अनुमोदिता। प्रसारमाध्यमान् सम्बोधयन् केन्द्रीय-सूचना-प्रसारण-मन्त्री अश्विनी-वैष्णवः अवदत् यत्, इयं योजना भारतस्य अङ्गारस्य, लिग्नाईट्-गैसीफिकेशनेत्यस्य च कार्यक्रमं गति-प्रदानाय प्रमुखं पदाक्षेपम् अस्ति। श्री वैष्णवः अवदत् यत् योजनायाः अन्तर्गतं त्रि-लक्ष-कोटि-रूप्यकाणां अपेक्षित-निवेशः भविष्यति।

-----------------------------------------------

## तमिलनाडु बहुमतपरीक्षणम्

तमिलनाडु-राज्ये, सी. जोसेफ् विजयस्य नेतृत्वे तमिलागा वेट्ट्री कझगम् दलस्य सर्वकारेण तमिलनाडु-विधानसभायां बहुमतपरीक्षणं विजितम्, चतुस्चत्वारिन्शोत्तरैकशत विधायकाः पक्षे मतदानं कृत्वा, सभायां स्पष्टं बहुमतं प्रदर्शितवन्तः। अत्रान्तरे द्वाविंशति विधायकाः विश्वास-प्रस्तावस्य विरुद्धं मतदानं कृतवन्तः। कार्याचरण-समये प्रमुखः विपक्षदलं डी. एम्. के. विधानसभासदनात् बहिर्गच्छत्। सद्यैव समाप्ते विधानसभानिर्वाचने तस्य दलेन केवलं अष्टोतरैकशतासनानि प्राप्तानि आसन्, तमिळनाडोः राज्यपालेन राजेन्द्र-विश्वनाथ-आर्लेकर् वर्येण विजयाय सदने बहुमतं साधयितुं आज्ञापितम् आसीत्।

------------------------------------------------

**पुदुचेरी शपथ**

अखिलभारतीय- राष्ट्रिय काङ्ग्रेस्-दलस्य नेता एन्. रंगासामिः अद्य पुदुचेरी-राज्यस्य मुख्यमन्त्रीरूपेण पञ्चमं बारं शपथ ग्रहणं कृतवान्। लोकनिवासे आयोजिते समारोहे पुदुचेरी-नगरस्य उपराज्यपालः के. कैलासनाथन्-वर्यः पदस्य गोपनीयतायाः च शपथ ग्रहणं कारितवान्। अखिलभारतीय-राष्ट्रिय काङ्ग्रेस्-दलस्य मल्लादि कृष्णरावः, भाजपेति दलस्य ए. नमस्सिवायम् च अस्मिन् समारोहे मन्त्रीरूपेण शपथं स्वीकृतवन्तः।

------------------------------------------------

**भारत-ऋतु-विभागः**

भारत-ऋतु-विभागेन अद्य राजस्थान-राज्ये उष्णतरङ्गस्य कृते 'रेड्-अलर्ट्' इति रक्तवर्णीय-संचेतनायाः सूचना प्रसारिता। गुजरात-राज्ये, महाराष्ट्रे, पश्चिम-मध्यप्रदेशे च श्वः यावत् उष्णतरङ्गस्य स्थितिः भवितुम् अर्हति। अपि च, अद्य हिमाचलप्रदेशे उत्तराखण्डे च ओलावृष्ट्या सह वर्षायाः सम्भावना विद्यते। अद्य दिल्ली, चण्डीगढ, हरियाणा, जम्मू-कश्मीर, उत्तरप्रदेश, झारखण्ड, पञ्जाब् इत्येतेषु प्रदेशेषु विद्युत्सहित-वृष्टिः, तीव्र-वायुवेगः च भविष्यति इति भारत-ऋतु-विभागेन पूर्वानुमानितम्।

------------------------------------------------

**सी.बी.एस.ई**

केन्द्रीय-माध्यमिक-शिक्षा-परिषदा द्वादशी कक्षायाः परीक्षा-परिणामाः प्रसारिताः। छात्राः आधिकारिक-वेबसाइट्, डिजिलॉकर्-इत्यत्र, उमङ्ग्-ऐप्-इत्यत्र च स्वानुक्रमाङ्कान् प्रविश्य परिणामं द्रष्टुं शक्नुवन्ति। अस्मिन् वर्षे केन्द्रीय-माध्यमिक-शिक्षा-परिषदा द्वादशी कक्षायाः परीक्षाः फरवरी-मासस्य सप्तदश-दिनाङ्कतः अप्रैल-मासस्य दश-दिनाङ्क-पर्यन्तं लक्षोपलक्ष-छात्राणां कृते आयोजिताः आसन्।

**।। इति वार्ता: ।।**